# सत्र –2014–15

**कक्षा – 9 विषयः–संस्कृतम् नियतकार्यम्–2**

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत ।

नम्रता एकः दिव्यः गुणः।विनम्राः जनाः परेषां हितमिच्छन्ति तदर्थं प्रयतन्ते अपि।विनयवन्तः यत्र गच्छन्ति स्वकीयव्यवहारेण सर्वान् वशीकुर्वन्ति ।ते कदापि ईदृशं वचनं नैव उच्चरन्ति येन जनाः दुःखिनः भवन्ति।येषु अयं गुणः न भवति ते उद्दण्डाः भवन्ति। पदे पदे विवदमानाः ते मित्राणि अपि शत्रुतां नयन्ति सिद्धमपि कार्यं नाशयन्ति।वस्तुतः विनयेन एव मनुष्याणां प्रतिष्ठा न तु गर्वेण।उद्धतस्वभावः कदापि हितकरः न भवति।अतः सर्वैः जनैः अविनयम् उद्दण्डतां च विहाय लघुभिः समवयस्कैः गुरुजनैः च सह विनम्रतया एव व्यवहर्तव्यम्।सत्यमुक्तम् –नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।शुष्कवृक्षाः च मूर्खाश्च न नमन्ति कदाचन।

**एकपदेन उत्तरत ।**

क. अस्माभिः कथं व्यवहारः कर्तव्यः ?

ख. कः गुणः दिव्यः कथ्यते?

**पूर्णवाक्येन उत्तरत ।**

क.येषु नम्रता न भवति ते कथं व्यवहरन्ति?

**निर्देशानुसारम् उत्तरत ।**

क. 'फलिनः' विशेषणपदस्य विशेष्यपदं किम्?

ख. 'त्यक्त्वा' इति कस्य पदस्य अर्थः ?

ग. 'मित्रताम् ' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

घ. 'प्रयतन्ते' इति क्रियापदस्य कर्तृपदं किम् ?

2. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य सन्धिः विच्छेदं वा कुरुत ।

क.अधुना ग्रीष्मर्तुः ................ अस्ति ।

ख. वर्षतीव ................. अंजनं नभः ।

ग.चौराः रात्रौ तत्+ धनं .................... अचोरयत् ।

घ. अनेकाः लताः+ अत्र ................... सन्ति ।

Edufever™

ङ.कस्त्वम् ?

3. 'सन्ध्याकालीनदृश्यम्'इति विषयमाधृत्य मञ्जूषासहायतया संस्कृतेन पंच वाक्यानि रचयत ।

(मञ्जूषा–बालकः, वृक्षाः ,कारयानानि ,उद्यानम्, सन्ध्याकालम् ,वायुगोलकानि, विक्रीय )

4. कोष्ठकगतप्रदत्तशब्दानां समुचितैः रूपैः रिक्तस्थानपूर्त्तिं कुरुत ।

| | |
|---|---|
| क.................. बहिः एकः जलाशयः अस्ति । | (गृह) |
| ख. .................. सह पुत्रः गच्छति । | (पितृ) |
| ग......................... उभयतः वृक्षाः सन्ति । | (नदी) |
| घ. सर्पः .................... बिभेति? | (किम्) |
| ङ. .................. बालिः बलवत्तरः। | (सुग्रीव) |
| च. .................. कालिदासः श्रेष्ठतमः । | (कवि) |

5. निम्नलिखितेषु वाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत ।

क. त्वं पाठं स्मृ+क्त्वा विद्यालयं गच्छ ।

ख. धनं हृ+तुमुन् चौरः आगच्छति ।

ग. दशतः पंच वियोज्य वद ।

घ. प्रतिदिनं पितरौ नत्वा गच्छेत् ।

ङ. एतत् निवेद्य तन्तुवायः अगच्छत् ।

6. अधोलिखितस्य श्लोकस्य अन्वयं कुरुत ।

सुचिरेणापि कालेन यशः किञ्चिन्मयार्जितम् ।

अचिरेणैव कालेन भरतेनाद्य सञ्चितम् ।।

अन्वयः– मया ...................... अपि कालेन ...................... यशः अर्जितम् ।...............

अचिरेण एव कालेन ................. (यशः)सञ्चितम् ।

7. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लेखनीयानि ।

क. राजा निजपुत्रान् विष्णुशर्मणः करे समर्पितवान् ।

ख. राजा पण्डितसभां कारितवान् ।

ग.विष्णुशर्मा बृहस्पतिः इव आसीत् ।

घ. राजा उवाच ''भोः भोः पण्डिताः ! कश्चित् विद्वान् अस्ति यः मम पुत्रान् शिक्षयितुं समर्थः ।''

Edufever™

ङ. भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् आसीत्।

च. राजा अचिन्तयत् ''सा माता शत्रुः येन बालः न पाठितः सः च पिता अपि शत्रुः येन बालः न पाठितः।''

छ. राजा स्वमूर्खपुत्रान् दृष्ट्वा विचारमग्नः अभवत् ।

ज. पाटलिपुत्रे सुदर्शनः नाम सर्वगुणोपेतः राजा आसीत् ।

8. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति ।
स समाः शतमव्याधिरायुषा न वियुज्यते ।।

**प्रश्नाः**

क. एकपदेन उत्तरत ।

कीदृशं स्वस्थवृत्तं व्यवहरेत् ?

ख.पूर्णवाक्येन उत्तरत ।

शतं समाः कः आयुषा न वियुज्यते ?

ग. निर्देशानुसारं उत्तरत ।

1. 'वर्षम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?
   अ. समाः  ब. उद्दिष्टम्  स. सम्यक्  द. अनुतिष्ठति
2. 'वियुज्यते' अस्य किं कर्तृपदमस्ति ?
   अ.यः  ब. अव्याधिः  स. आयुषा  द.सः

9. समुचितं भावार्थं चिनुत ।

अ.क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।

क.समुचितसमये कार्यं कुर्यात्

ख.कार्यस्य आनन्दं स्वयम् एव नश्यति ।

ग. कार्यस्य स्वादः न्यूनः भवति ।

ब.तत् त्वम् असि ।

क. आत्मा अविनाशी अस्ति ।

ख. त्वं ज्ञानवान् असि ।

ग.त्वं परमात्मा असि ।

-----0-----

Edufever™